# Pancharakshadevistotrani

# पञ्चरक्षादेवीस्तोत्राणि

## Document Information

Text title : Pancharakshadevistotrani

File name : pancharakShAdevIstotrANi.itx

Category : devii, devI, buddha, raksha

Location : doc_devii

Transliterated by : DSBC staff

Proofread by : Miroj Shakya

Acknowledge-Permission: Prof. Miroj Shakya, Text Nagarjuna Institute of Exact Methods, Digital Sanskrit Buddhist Canon Project, University of the West https://www.dsbcproject.org/

Latest update : March 8, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 8, 2025

*sanskritdocuments.org*

# पञ्चरक्षादेवीस्तोत्राणि

## १ महाप्रतिसरास्तोत्रं

ॐ नमः श्रीमहाप्रतिसरायै ।
तथागताद्यास्तथतां तत्त्वमापुर्महत्तरम् ।
धारणीधारणाद्यस्याः प्रतिसरां नमामि ताम् ॥ १॥

रणे शक्रोऽजयद्दैत्यान् धारणीध्वजधृग् बहून् ।
सङ्ग्रामजयदां भीमां प्रतिसरां नमामि ताम् ॥ २॥

यत्प्रभावाद् ब्रह्मदत्तोऽलभद् राज्यमकण्टकम् ।
सार्वभौमप्रदां देवीं प्रतिसरां नमामि ताम् ॥ ३॥

बह्वपराधोऽपि यद्भक्तो राज्याधिकारमाप्तवान् ।
शस्त्रादिभीतिसंहर्त्रीं प्रतिसरां नमामि ताम् ॥ ४॥

रत्नान्यवापुर्वणिजो यां स्मृत्वोदधिनिर्गताः ।
सर्वबाधाप्रशमनीं प्रतिसरां नमामि ताम् ॥ ५॥

श्रीमहाप्रतिसरारक्षादेवीस्तोत्रं सम्पूर्णम् ।

## २ महामन्त्रानुसारिणीस्तोत्रं

ॐ नमः श्रीमहामन्त्रानुसारिण्यै ।
बुद्धाधिष्ठानतो बुद्धाभयदां भयनाशिनीम् ।
भवाम्बुधिनिमग्नानां नमो मन्त्रानुसारिणीम् ॥ १॥

यन्मन्त्रोच्चारणादेव षडीतयः सुदारुणाः ।
नाशं प्रयान्ति वरदां नमो मन्त्रामुसारिणीम् ॥ २॥

मन्त्रानुसारिणो लोकान् नान्ये मन्त्रादयो ग्रहाः ।
पीडयन्ति प्रियांश्चापि नमो मन्त्रानुसारिणीम् ॥ ३॥

बुद्धोऽभ्यभाषद् गाथास्ता यन्मन्त्रकथनान्तरम् ।
याभिः सर्वत्र स्वस्ति स्यान्नमो मन्त्रानुसारिणीम् ॥ ४॥

कलौ बुद्धविहीनेऽस्मिन् लोकानां हितमाचरेत् ।
पापोत्पातप्रशमनीं नमो मन्त्रानुसारिणीम् ॥ ५॥

श्रीमहामन्त्रानुसारिणीस्तोत्रं सम्पूर्णम् ।

## ३ महामायूरीस्तोत्रं

ॐ नमः श्रीमहामायूरीयै ।
दुष्टं कृष्णभुजङ्गं च नरः स्वान्तिकं पालयेत् ।
यस्या मन्त्रानुभावेन मायूरीं प्रणमामि ताम् ॥ १॥

ब्रह्मादयो लोकपाला यद्धारण्या समाप्नुवन् ।
स्वानि स्वान्यधिकाराणि मायूरीं प्रणमामि ताम् ॥ २॥

स्वर्णावभासं शिखिनं नालभञ्जपिनं कुधीः ।
अमोघेनापि पाशेन मायूरीं प्रणमामि ताम् ॥ ३॥

यन्मन्त्रजपतो जीवाः प्राजीवञ्छुष्कपादपाः ।
मृतसञ्जीविनीं देवीं मायूरीं प्रणमामि ताम् ॥ ४॥

यन्मन्त्रिसङ्गात् पवनो महोपद्रवशान्तिकृत् ।
बुद्धानां बोधिदां नित्यं मायूरीं प्रणमामि ताम् ॥ ५॥

श्रीमहामायूरीरक्षादेवीस्तोत्रं सम्पूर्णम् ।

## ४ महाशीतवतीरक्षादेवीस्तोत्रं

ॐ नमो महाशीतवत्यै ।
यद्धारणीमनुजपन् राहुलो भद्रमाप्तवान् ।
विहेठितो ग्रहैः सर्वैः शीतवतीं नमाम्यहम् ॥ १॥

पापतापे शीतकरीं शीतलाद्युपसर्गतः ।
शीतोष्णदुःखशमनीं शीतवतीं नमाम्यहम् ॥ २॥

मन्त्रग्रन्थितसूत्राणां धारणाल्लक्षयोजनम् ।
पथिकानां पालयित्रीं शीतवतीं नमाम्यहम् ॥ ३॥

श्मशानस्थेन मुनिना या समुच्चारिता पुरा ।
ग्रहोपद्रवशान्त्यर्थं शीतवतीं नमाम्यहम् ॥ ४॥

ग्रहाभिभूतवातानां ग्रन्थिपदविधारिणाम् ।
ग्रहभीतिप्रशमनीं शीतवतीं नमाम्यहम् ॥ ५॥

श्री महाशीतवतीरक्षादेवीस्तोत्रं सम्पूर्णम् ।

## ५ महासाहस्रप्रमर्दिनीस्तोत्रं

ॐ नमः श्रीमहासाहस्रप्रमर्दिन्ये ।
महासाहस्रिके लोके साहस्रहितकारिणाम् ।
सहस्रसत्त्वजननीं नौमि साहस्रमर्दिनीम् ॥ १॥

सोपद्रवायां वैशाल्यां महोत्सवो यतः सदा ।
महोपसर्गशमनीं नौमि साहस्रमर्दिनीम् ॥ २॥

यक्षराक्षसभूतानां दमनीं दुष्टचेतसाम् ।
दुरितोपद्रवहतां नौमि साहस्रमर्दिनीम् ॥ ३॥

यद्धारणीपठनतो रक्षितः शाक्यकेशरी ।
विषतो विषदिग्धां तां नौमि साहस्रमर्दिनीम् ॥ ४॥

मधुमिश्रितभैषज्यं सर्वरोगनिवारणम् ।
मृतसञ्जीवनं लोके नौमि साहस्रमर्दिनीम् ॥ ५॥

इति श्रीमहासाहस्रमर्दिनीरक्षादेवीस्तोत्रं सम्पूर्णम् ॥

*Pancharakshadevistotrani*

pdf was typeset on March 8, 2025

Please send corrections to *sanskrit@cheerful.com*